पेज संख्या ६ = 1

① 27×15× 0.1 c.m

तुनिश्चलः इताद्रिय न्यार्ग ३ प्रलवंठाद्रिमा लांकेयो
... ...
प्राप्ति वीन्त्योह्रिकेनाटि अकुोगृहे द्रिंकरोति

---

② भाणिकणिकास्त संकल्पम पेज - 1

श्री गणेशायनमः स्वस्ति श्री समस्तजगुदत्पाती
... ...
क्षीरोदकाणाविपरिवृतजंबूद्वृकशाल्मलिकुशक्रौंच

25×11×0.1c.m

---

③ पेज -2 = 1 29×12.6× 0.1c.m.

योगिता काभाव प्रासिद्धिरत भाट वान्हि त्वनेति
... ...
प्रबंधंभारतीति हिं प्रतीति हि वान्हि भाजन प्राप्ति

---

④ पेज -5 = 1 32×14.7×0.1 c.m

विषय - पुराण

परिणय भोगायनपूजीत विचारणा ... ...

ब्राह्मणगनशो जायेत्वाच्च पददानानिदापयेत् ॥

नृपेद ।

३

तुनिश्चलः हृतांकियन्मार्ग३ प्रश्नवर्णाक्रमात्तांकेयोगोद्वाभ्यांहृतोग्नि
युक् वसुभिश्चहृतेद्वाागंशेषांकेफलमादिशेत् एकेनतंस्थितस्तत्रद्विशे
षेमार्गमाश्रितः त्रिशेषेमार्गगार्द्धेतुचतुर्थेग्रामसन्निधौ पंचमेपुनरायृ
तिःषष्ठेव्याधिसमावृतः सप्तमेचगृहेज्ञेयोवसुभिश्चोरसंकुलः ९३ अर्गला
निर्गमप्रश्नः प्रभुस्वनामयोरैक्यंहिनिघ्नंतुदशेरसैर्युतं त्रिभिर्विभाजिते
शेषेवसुभिर्गुणितंपुनः ९४ त्रिभिर्विभक्तंशेषांकेफलंब्रूयात्शुभाशुभम्
एकतोचिरकालेनद्वितीयेबहुकालतः शून्यशेषेमहादुःखंविनाद्रव्ये
णमुच्यते अथोप्रश्नवचिंता प्रश्नाक्षरतिथिगुणपात्सनात्कालियुटिकान्वि
ता द्वाभ्यांभक्तान्वेकशेषेप्राप्तिर्वाच्योद्विकेनहि अमुकोगृहेकिंकरोति

2

मारद. तो. ४.
सुहागा तो. ४
गंधक तो. २

[illegible]

योगिताकाभावप्रसिद्धिरत आह वह्नित्वेनेति वह्नित्वेन निर्व
ह्नौ सर्वैषामभावः सुलभ इति योजना ननु जले वह्नित्वेन प्रमे
यं नास्तीति प्रतीतिर्हि वह्निमात्रप्रतियोगिकाभावमवगाहते
न तु प्रमेयसामान्यप्रतियोगिकं वह्निमति तादृशप्रतीत्यनुत्प
त्त्या वह्निप्रतियोगिकाभावावगाहित्वस्य आवश्यकत्वादत
आह अवच्छेतीति नघाच गगनत्वेन प्रमेयं नास्तीति प्रतीत्यै
व प्रमेयसामान्यप्रतियोगिकाभावप्रसिद्धिः नहि तत्रापि ग

नितदप्रसिद्धेरनुगताल्लन्यूनत्वमत आह प्रमेयेति भावत्वे
नेति भावत्वेनाभावानामभावः सर्वत्र सुलभ इत्यन्वयः ननु
भावत्वेनाभावो नास्तीति प्रतीतिरभावस्यैवाभावत्वेन भावो ना
स्तीति प्रतीतिर्भावस्यैव प्रतियोगित्वमवगाहते नन्वेतावता
प्रमेयमात्रप्रतियोगिताकाभावप्रसिद्धिरत आह वह्नित्वेने
ति वह्नित्वेन निर्दिष्टो सर्वेषामभावः सुलभ इति योजना ननु
जले घटवह्नित्वे प्रमेयं नास्तीति हि प्रतीतिर्हि वह्निमात्रप्रति

पैशाय भोजाय नयुं जीतवि चक्षणाः ॥१९॥ एकादशे कस्य दानं व्यास व्याकन्या पयस्वनी ॥ सावि कीता विमक्ता वा
दातुः सप्त कुलानि वै ॥२०॥ कुलैक विंशो युतं गृहीतारं च पातयेत् ॥ भूमिस्थं च यं यावित्तं स्वहस्तेन नि
निवेशितं तत्तदुत्फलमवाप्नोति यद्दत्तं स्वकरेणवे ॥ स्वल्पेनापीह वित्तेन स्वयं हस्तेन यत्कृतं ॥२२॥ वृद्धि
माप्नोति तत्सर्वं आज्येनेव कृतं घ्राने ॥ अदेशाकालयोर्दत्तं विधिहीनं च यत्तव ग ॥ सर्वं संपूर्ण
तां याति श्रद्धापूतेन चेतसा ॥२४॥ तस्मात्सर्वप्रकर्तव्यं जीवतश्चेद्दलं भवेत् ॥ गृहितदानपाथे
य सुखं याति महाध्वनि ॥२५॥ अन्यथा क्लिश्यते जंतुः पाथेयरहितः पथि ॥ मोक्षकामः सकामो
वा वृषोत्सर्गं समाचरेत् ॥२६॥ अपुत्रोपि च यः कुर्यात्सुखं याति महाध्वनि ॥ वृषोत्सर्गं विना मे
र्त्यो नेति पुत्रोपि सद्गतिं ॥२७॥ अग्निहोत्रादिभिर्यज्ञैर्दानैश्चा विविधैरपि ॥ न तां गतिमवाप्नो
ति वृषयज्ञेन यां गतिः ॥२८॥ तार्क्ष्यो वाच ॥ कथं स्वप्रसादेन सर्वं जीव क्रियाविभो ॥ कस्मिन्नाये
तिथौ कस्यां विधिना केन सा भवेत् ॥२९॥ कृत्वा किं फलमाप्नोति तन्मे वद सुरोत्तम ॥ श्रीभगवानुवा
च ॥ कार्तिकादिषु मे मासे उत्तरायणगे रवौ शुक्लेपक्षेथवा कृष्णे द्वादश्यादिषु जेतिथौ ॥२० शुभेल
ग्ने मुहूर्ते वा शुचौ देशे समाहितः ॥ श्रोत्रियविप्रमाहूय विधिज्ञं शुभलक्षणं ॥२१॥ जपैर्होमैस्तथा
दानैः प्रकुर्याद्देहशोधनं ॥ शुभे योगे च नक्षत्रे पितृन्देवांश्च पूजयेत् ॥२२॥ होमं कुर्याद्यथाशा

५५

२ प्र पु दम

त्र्यामेत्रैरश्वविविधैःसुभैः॥ग्रहाणांस्थापनंकुर्यात्पूजनंचखगाधिप॥२३॥मातृणांस्थापनं
कुर्याद्वसोर्धारांचपातयेत्॥वह्निंसंस्थाप्यपश्चाद्वैस्वशाखोक्तंविधिंचरेत्॥२४॥सालग्रामंच
संस्थाप्यवैष्णवंश्राद्धमाचरेत्॥वृषंसंपूज्यतत्रैववस्त्रालंकारभूषणैः॥२५॥चतस्रोवत्स
तर्यश्चपार्श्वेसंस्थाप्यभूषिताः॥वह्नेःप्रदक्षिणांतेवांकारयित्वाविसर्जयेत्॥२६॥इमंमंत्रंसमु
च्चार्यकर्णमांतेऽब्रुवत्सुखं॥धर्मस्त्वंवृषरूपेणब्रह्मणानिर्मितःपुरा॥तवोत्सर्गप्रभावेनमामुद्धर
भवार्णवात्॥२७॥आत्मश्राद्धंततःकुर्याज्जलदानंचदायकः॥आत्मनोयदिवंस्यात्तत्तद्
द्यात्स्वशक्तितः॥२८॥सुखेनदुस्तरंमार्गंमर्त्योयातिततःसुखं॥जीवन्यःक्रियांकृत्वामर्त्यो
स्तौर्ध्वदेहिकी॥२९॥यावत्क्षिप्यतेयस्यवृषोत्सर्गंखगाधिप॥स्वदत्तंपरदत्तंवानैवं
तस्योपतिष्ठति॥३०॥एकविंशतिवर्षोर्द्ध्वंजीवेच्चेत्तांपुनश्चरेत् एकोद्दिष्टेनविधिनास्वा
णाकारेणधीमता॥३१॥कार्यमेकादशाहंचद्वादशाहंतुयत्नतः॥सपिंडीकरणादर्वाक्
कुर्याच्छ्राद्धानिषोडशः॥३२॥ब्राह्मणान्भोजयित्वाचपददानानिदापयेत्॥त्रयोद
अभिषिच्यवृषमंत्रेरुद्रकुंभोदकेनच॥तेनकीर्तितमंत्रेणवृषोत्सर्गंकृतंसति॥६॥